# त्रयोदशः पाठः 13

## Lesson – 13

# विडम्बनकविताः

आधुनिकसंस्कृतकाव्यप्रपञ्चे "कलिविडम्बनम्" इति विख्यातं प्रबोधककाव्यम् (Satire) अनन्यसदृशं स्थानमर्हति । काव्येऽस्मिन् कविः श्रीनीलकण्ठदीक्षितः शताधिकैः सुललितैः श्लोकैः कलौ युगे विविधजनानाम् उपहासास्पदजीवनयुक्तीः सम्यक् वर्णयति । ततः अत्र कतिपयाः श्लोकाः उदाह्रियन्ते



पण्डितः – Scholar

असम्भ्रमो विलज्जत्वम्
अवज्ञा प्रतिवादिनि ।
हासो राज्ञः स्तवश्चेति
पञ्चैते जयहेतवः ।। 1

मान्त्रिकः – Advisor

सुखं सुखिषु दुःखञ्च
जीवनं दुःखशालिषु ।
अनुग्रहायते येषां
ते धन्याः खलु मान्त्रिकाः ।। 2

ज्यौतिषिकः - Astrologer

आयुः प्रश्ने दीर्घमायुः
वाच्यं मौहूर्तिकैः जनैः ।
जीवन्तो बहु मन्यन्ते
मृताः प्रक्ष्यन्ति कं पुनः ।। 3

भिषक् - Physician

स्वस्थैः असाध्यरोगैश्च
जन्तुभिः नास्ति किञ्चन ।
कातरा दीर्घरोगाश्च
भिषजां भाग्यहेतवः ।। 4

उत्तमर्णः – Creditor

अन्तकोऽपि हि जन्तूनाम्
अन्तकालमपेक्षते ।
न कालनियमः कश्चित्
उत्तमर्णस्य विद्यते ।। 5

धनिकः - An Affluent

स्तोतव्यैः स्तूयते नित्यं
सेवनीयैश्च सेव्यते ।
न बिभेति च जिह्रेति
तथापि धनिको जनः ।। 6

शठः - Wicked

न स्वार्थं किञ्चिदिच्छन्ति
न प्रेर्यन्ते केनचित् ।
परार्थेषु प्रवर्तन्ते
शठाः सन्तश्च तुल्यवत् ।। 7
परच्छिद्रेषु हृदयं
परवार्तासु च श्रवः ।
परमर्मसु वाचं च
खलानाम् असृजत् विधिः ।। 8

कविपरिचयः अस्य कवेः श्रीनीलकण्ठदीक्षितस्य जन्म सुप्रसिद्धसंस्कृतविद्वद्वरेण्यस्य श्रीअप्पय्यदीक्षितस्य वंशेऽभूत् । अपि च कविरयं द्रविडदेशे सुप्रसिद्ध "मदुरैनगरस्य तिरुमलै नायक्कर् इति प्रख्यातस्य नृपतेः सभायां मुख्यमन्त्री एवं राष्ट्रकविः च आसीत्। अस्य कालः तु क्रिस्ताब्दीय सप्तदशशतकः (17th cent.A.D) इत्यनुमीयते।।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. विलज्जत्वम् - shamelessness
2. अवज्ञा - disregard
3. जीवनम् - life
4. कातरः - coward
5. रोगः - disease
6. हृदयम् - heart
7. असंभ्रमः - steadiness
9. धनिकः - rich
11. श्रवः - ear
12. विधिः – lord Brahma

### II. अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. अपेक्षते - लट् - आत्मनेपदी, प्रथमपुरुषः, एकवचनम् of ईक्ष् with अप to look
2. सेव्यते - कर्मणि लट् – आत्मनेपदी, प्रथमपुरुषः, एकवचनम् of सेव् to serve
3. मन्यन्ते - लट् – आत्मनेपदी, प्रथमपुरुषः, बहुवचनम् of मन् to think
4. इच्छन्ति - लट् – प्रथमपुरुषः,बहुवचनम् of इच्छ् to like
5. प्रक्ष्यन्ति - लृट् – प्रथमपुरुषः, बहुवचनम् of प्रच्छ् to ask
6. असृजत् - लङ् – प्रथमपुरुषः, एकवचनम् of सृज् to create
7. स्तूयते - कर्मणि लट् - आत्मनेपदी, प्रथमपुरुषः, एकवचनम् of स्तु to pray
8. प्रवर्तन्ते - लट् – आत्मनेपदी, प्रथमपुरुषः बहुवचनम् of वृत् (वर्त्) with प्र to remain meaning engaged in

### III. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत-

| | | | | | |
|---|---|---|---|---|---|
| 1. शुचिवेषः + च | = | शुचिवेषश्च | 2. तथा + अपि | = | तथापि |
| 3. अन्तकः + अपि | = | अन्तकोऽपि | 4. पञ्च + एते | = | पञ्चैते |
| 5. किञ्चिदिच्छति | = | किञ्चित् + इच्छति | 6. धन्याः + ते | = | धन्यास्ते |
| 7. नास्ति | = | न + अस्ति | 8. श्वशुरस्तु | = | श्वशुरः+ तु |
| 9. दीर्घमायुः | = | दीर्घम् + आयुः | 10. सन्तश्च | = | सन्तः + च |



Unit 13.indd 88 06-06-2018 12:46:06

IV. अधो लिखितानां पदानां सन्धिम् अथवा सन्धिच्छेदं कुरुत-

1. असम्भ्रमः - ____________________
2. भाग्यहेतवः - ____________________
3. जयहेतवः - ____________________
4. कालनियमः - ____________________
5. परवार्तासु - ____________________
6. दीर्घरोगाः - ____________________
7. असाध्यरोगैः - ____________________
8. परार्थेषु - ____________________
9. परमर्मसु - ____________________
10. विलज्जत्वम् - ____________________

V. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

1. सभा - समितिः
2. लज्जा - ह्रीः
3. कृपणः - कदर्यः
4. चिकित्सकः - वैद्यः
5. भार्या - पत्नी
6. धनिकः - सम्पन्नः
7. खलः - दुर्जनः
8. रोगः - व्याधिः

VI. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत

1. अवज्ञा × अनवज्ञा
2. पराजयः × जयः
3. रोगी × स्वस्थः
4. दरिद्रः × धनी
5. सन्तः × दुष्टाः
6. औदार्यम् × कार्पण्यम्
7. स्वार्थः × परार्थः
8. नित्यम् × अनित्यम्



Unit 13.indd 89 06-06-2018 12:46:06

## VII. अधो लिखितानां प्रश्नानाम् उत्तराणि लिखत-

1. कलिविडम्बनं केन विरचितम् ?
2. "पञ्चैव जयहेतवः" – के ते ?
3. कलियुगे कथं भवन्ति ?
4. मौहूर्तिकैः जनैः किं वाच्यम् ?
5. भिषजां भाग्यहेतवः के?
6. अन्तक-उत्तमर्णयोः भेदः कः?
7. "तथापि धनिको जनः" – व्याख्यात।
8. शठानां स्वभावः कीदृशः ?
9. विधिः खलानां हृदयं, श्रवः, वाचं च किमर्थम् असृजत् ?

## IX. सविस्तरम् उत्तरत –

1. टिप्पणीं लिखत-

   (i) ज्यौतिषिकः      (ii) पण्डितः

   (iii) धनिकः      (iv) उत्तमर्णः

2. व्याख्यात-

   (i) मान्त्रिकः      (ii) भिषक्      (iii) शठः

## X. कोष्ठात् उचितं पदं चित्वा रिक्तस्थानं पूरयत-

1. बभूव नहुषः तस्मिन् ________ इवाम्बुधौ।
2. यथावत् साधकस्येव, यावदर्था _______ ।
3. ______ येनैन्द्रं अर्धासनमधिष्ठितम् ।
4. तटाकमिव _______तमिन्द्रमिव निर्जराः ।
5. दक्षिणं लोकपालं तम् अमन्यन्त ______ ।



Unit 13.indd 90 06-06-2018 12:46:06

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

कालः अनादिः अखण्डः च । किन्तु अस्माकं व्यवहाराय एव कालभेदः प्रवर्तते । ब्रह्मणा एषा कालगणना प्रारब्धा । कृतयुगं त्रेतायुगं द्वापरयुगं कलियुगञ्चेति चत्वारि युगानि ।

तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ।।

श्रीमद्भागवते द्वादशस्कन्धे विभिन्नयुगानां वर्णनं कृतमस्ति। कलियुगवर्णनसन्दर्भे-

वित्तमेव कलौ नृणां जन्माचारगुणोदयः।
धर्मन्यायव्यवस्थायां कारणं बलमेव हि ।।
अनावृष्ट्या विनङ्क्ष्यन्ति दुर्भिक्षकरपीडिताः ।
शीतवातातपप्रावृड् हिमैरन्योन्यतः प्रजाः ।।
क्षुत्तृड्भ्यां व्याधिभिश्चैव सन्तप्स्यन्ते च चिन्तया।
त्रिंशद्विंशति वर्षाणि परमायुः कलौ नृणाम् ।।
कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः ।
कीर्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत् ।।

### नीलकण्ठदीक्षितस्य अन्याः कृतयः

शिवलीलार्णवः, गङ्गावतरणम्, नीलकण्ठविजयचम्पूः नलचरित्रम्, सभारञ्जनशतकम्, वैराग्यशतकम्, अन्यापदेशशतकम्, आनन्दसागरस्तवः, शिवोत्कर्षमञ्जरी, शान्तिविलासः इत्यादयः।।

### Weblinks :

1. https://nangia.in/kalividambanna.vaidyaah
2. https://sa.in.wikipedia.org/wiki/नीलकण्ठदीक्षितः



Unit 13.indd 91 06-06-2018 12:46:06